त्वक्पत्रं, क्ली, (त्वगिव पत्राण्यस्य ।) गुड़त्वक् । इत्यमरः ।२।४।१३४॥ तेजपत्रम् । इति केचित् । इति भरतः॥ तत्पर्य्यायः । उत्कटम् २ भृङ्गम् ३ त्वचम् ४ चोचम् ५ वराङ्गकम् ६ । इत्यमरः ।२। ४ । १३४ ॥ (यथा, महाभारते ।१२।१७०।१८। "चन्दनागुरुमुख्यानि त्वक्पत्राणां वनानि च ॥" यथा, सुश्रुते । १ । ४४ ।
"रेचनं सुकुमाराणां त्वक्पत्रमरिचांशकम् ॥")

त्वक्पत्री, स्त्री, (त्वक्पत्र + गौरादित्वात् ङीष् ।) हिङ्गुपत्री । तत्पर्य्यायः । कारवी २ पृथ्वी ३ वाष्पीका ४ कवरी ५ पृथुः ६ । इत्यमरः । २ । ६ । ४० ॥ तत्पत्री ७ । इति भरतः ॥

त्वक्पुष्पं, क्ली, (त्वचश्चर्म्मणः पुष्पमिव ।) रोमाञ्चः । इति त्रिकाण्डशेषः । किलासम् । इति हेमचन्द्रः । ३ । १३१ ॥

त्वक्पुष्पिका, स्त्री, (त्वक्पुष्पी + स्वार्थे कन् पूर्व्वह्रस्वः ।) किलासम । इति त्रिकाण्डशेषः ॥ छुली इति भाषा ॥

त्वक्पुष्पी, स्त्री, (त्वक्पुष्प + गौरादित्वात् ङीष् ।) किलासम् । इति जटाधरः ॥

त्वच, त्वचोग्रहे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) त्वचो ग्राहश्चर्म्मणो ग्रहणम् । त्वच त्वचने इति प्राञ्चः । त्वचनं संवरणमिति रमानाथः । त्वचति कायं वर्म्मणा भटः । इति दुर्गादासः ॥

त्वक्ष, ऊ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-वेट् ।) ऊ, त्वक्षिष्यति त्वक्ष्यति । कार्श्यं कृशीकरणम् । त्वक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

त्वक्सारः, पुं, (त्वचि सारो यस्य ।) वंशः । इत्यमरः । २ । ४ । १६० ॥ (यथा, मनुः ।१०।३७ ।
"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥"
वंशस्य त्वगपि । मैँचाड़ि इति भाषा ॥ यथा, सुश्रुते । १ । ८ ।
"अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुलय इति ॥") गुड़त्वक् । इति शब्दचन्द्रिका ॥ शोणद्रुमः । रन्ध्रवंशः । इति राजनिर्घण्टः ॥ (तल्तावाँश इति भाषा ॥ यथा, माघः । ४ । ६१ ।
"त्वक्साररन्ध्रपरिपूरितलब्धगीतिरस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः ॥")

त्वक्सारभेदिनी, स्त्री, (त्वचः सारं भिनत्तीति । भिद् + णिनिः + ङीप् ।) क्षुद्रचञ्चुवृक्षः । इति राजनिर्घण्टः ॥

त्वक्सारा, स्त्री, (त्वक्सारो वंश उत्पत्तिकारणत्वेनास्त्यस्याः अच् ततष्टाप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

त्वक्सुगन्धः, पुं, (त्वचि सुगन्धः सद्गन्धो यस्य ।) नारङ्गः । इति भावप्रकाशः ॥

त्वक्सुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः ।) एलवालुकनामगन्धद्रव्यम् । इति जटाधरः ॥

त्वग, इ कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-गतौ सकं-सेट् ॥)

त्वगङ्कुरः, पुं, (त्वचश्चर्म्मणः अङ्कुर इव ।) रोमाञ्चः । इति त्रिकाण्डशेषः ॥

त्वगाक्षीरी, स्त्री, (त्वक्क्षीरी । पृषोदरादित्वात् साधुः ।) तुगाक्षीरी । वंशलोचना । इति जटाधरः ॥

त्वग्गन्धः, पुं, (त्वचि गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वग्जं, क्ली, (त्वचः जायते इति । जन + डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

त्वग्दोषः, पुं, (त्वचो दोषो दूषणं यस्मात् ।) कोठरोगः । इति राजनिर्घण्टः ॥ त्वग्जातरोगः । तस्यौषधं यथा,—
"मन्दोष्णलोध्रनीराम्रचूर्णन्तु कनकस्य च ।
तेनोद्वर्त्तितदेहस्य हरेद्रोगंप्रसारिकाम् ॥
त्वद्दोषश्चैव सिध्म च घर्म्मदोषश्च नश्यति ॥"
इति गारुड़े १६४ अध्यायः ॥
स तु महारोगः । यथा, "महारोगिणः पापरोगाष्टकान्यतमरोगवतः । ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः ।" इति शुद्धितत्त्वम् ॥

त्वग्दोषापहा, स्त्री, (त्वग्दोषं रोगविशेषं अपहन्तीति । हन + डः ।) वाकुची । इति राजनिर्घण्टः ॥

त्वग्दोषारिः, पुं, (त्वग्दोषस्य रोगविशेषस्य अरिः शत्रुः । तन्नाशकत्वात् तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

त्वच, श संवृत्याम् । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) वकारयुक्तः । दन्त्यवर्गाद्यादिः । श, त्वचती त्वचन्ती । वृतिः संवरणम् । त्वचति कवचेन देहं वीरः । इति दुर्गादासः ॥

त्वचं, क्ली, (प्रशस्ता त्वगस्त्यस्येति । अर्श आदित्वात् अच् ।) वृक्षविशेषः । दारचिनि इति भाषा ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये ।
"सोमवल्कस्तथा श्वेता पथ्यं कालीयकं त्वचम् ॥")
तत्पर्य्यायः । त्वक् २ वल्कलम् ३ भृङ्गम् ४ वराङ्गम् ५ मुखशोधनम् ६ शकलम् ७ सिंहलम् ८ वन्यम् ९ सुरसम् १० कामवल्लभम् ११ उत्कटम् १२ बहुगन्धम् १३ विज्जुलम् १४ वनप्रियम् १५ नटपर्णम् १६ गन्धवल्कम् १७ वरम् १८ शीतम् १९ । अस्य गुणाः । कटुत्वम् । शीतलत्वम् । कफकासविनाशित्वम् । शुक्रामशमनत्वम् । कण्ठशुद्धिकरत्वम् । लघुत्वम् । इति राजनिर्घण्टः ॥ वल्कलम् । चर्म्म । (यथा, हरिवंशे । १७७ । १३६ ।
"श्रीवत्साङ्कोऽरविन्दाक्ष ऊर्द्ध्वरोमा मृदुत्वचः ॥"
कञ्चुकः । खोलस् इति भाषा ॥ यथा, महाभारते । १२ । २४६ । ११ ।
"विमुक्तः सर्व्वपापेभ्यो मुक्तत्वच इवोरगः ॥")
गुड़त्वक् । इति धरणिः ॥

त्वचा, स्त्री, (त्वच् + पचे टाप् । यद्वा, त्वचति संवृणोति सर्व्वशरीरमिति अच् ततष्टाप् ।) त्वक् । इति शब्दरत्नावली ॥

त्वचापत्रं, क्ली, (त्वचा त्वक् पत्रमिव यस्य ।) त्वक्पत्रम् । इति शब्दरत्नावली ॥

त्वचिष्ठः, त्रि, (अतिशयेन त्वग्वान् । त्वग्वत् + इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६४ । इति मतुपो लुक् ।) त्वचीयान् । अतिशयत्वग्विशिष्टः । इति व्याकरणम् ॥

त्वचिसारः, पुं, (त्वचि सारो यस्य । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) वंशः । इत्यमरः । २ । ४ । १६० ॥

त्वचिसुगन्धा, स्त्री, (त्वचि सुगन्धो यस्याः । सप्तम्या अलुक् ।) क्षुद्रैला । इति हारावली ।९७॥

त्वत्, त्रि, (तनोतीति । तन + "तनोतेरनश्च वः ।" उणां २ । ६३ । इति चकारात् क्विप् तुक् अनश्च वः ।) भिन्नः । इति जटाधरः ॥ (युष्मद्शब्दस्य पञ्चम्येकवचनस्य रूपम् ।) भवतः । इति व्याकरणम् ॥ तोमा हइते इति भाषा ॥

त्वञ्च, उ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । क्त्वावेट् ।) वकारयुक्तादिः । उ, त्वचित्वा त्वक्त्वा । इतिर्गतिः । इति दुर्गादासः ॥

त्वञ्च, उ ध सङ्कोचे । इति कविकल्पद्रुमः ॥ (रुधां-परं-सकं-सेट् । क्त्वावेट् ॥)

त्वदीयं, त्रि, (तव इदम् । युष्मद् + छः । "प्रत्ययोत्तरपदयोश्च ।" ७ । २ । ९८ । इति मपर्य्यन्तस्य त्वादेशः ।) भवदीयम् । इति व्याकरणम् ॥ (यथा, रघुः । ३ । ५० ।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः ॥")

त्वर, ञि ष म ङ सम्भ्रमे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ञि, त्वरितः तूर्णोऽस्ति । वा रुषामत्वरसंघुषास्वनिभ्यो निष्ठायां वेमत्वेऽपि वेदेषु वारणभेदार्थमेतदनुबन्धमन्ये मन्यन्ते । ष, त्वरा । म, त्वरयति । ङ, त्वरते । सम्भ्रम इह शीघ्रमनुष्ठानम् । नानुनेतुमशक्ताः स तत्वरे । इति दुर्गादासः ॥

त्वरणं, क्ली, (त्वर + भावे ल्युट् ।) त्वरा । इति व्याकरणम् ॥ (त्वरते शीघ्रं गच्छतीति । त्वर + ल्युः । द्रुतगामिनि, त्रि । यथा, अथर्व्ववेदे ।११। ८ । २८ ।
"आस्नेयीश्च वास्तेयीश्च त्वरणाः कृपणाश्च याः ॥")

त्वरा, स्त्री, (त्वरणमिति । त्वर + "षिद्भिदादिभ्योऽङ् ।" इति अङ् । ततः स्त्रीलिङ्गत्वात् टाप् ।) वेगः । तत्पर्य्यायः । सम्भ्रमः २ । इत्यमरः ।१। २ । २६ ॥ आवेगः ३ त्वरिः ४ तूर्णिः ५ संवेगः ६ । इति हेमचन्द्रः ।२।२३६॥ (यथा, महाभारते । ३ । २७९ । २७ ।
"यद्यहत्त्वं मया पूर्व्वं निर्ज्जितो जीवितप्रियः । मुक्तो मातिरिरति ज्ञात्वा का त्वरा मरणे पुनः ॥")